द.पू. रसंयोगवियोगहेतवः ५० एवंविमृश्यतंपापंयावदात्मनिदर्शनं।पूजयामासवैशौरिर्बहुमानपुरः
४ सरं ५१ प्रसन्नवदनांभोजोनृशंसंनिरपत्रपं।मनसादूयमानेनविहसन्निदमब्रवीत ५२ वसुदेव
उवाच नह्यस्यास्तेभयंसौम्ययद्वैसाहाऽशरीरवाक्।पुत्रान्समर्पयिष्येस्यायतस्तेभयमुत्थितं ५३
श्रीशुकउवाच स्वसुर्वधान्निववृतेकंसस्तद्वाक्यसारवित।वसुदेवोपितंप्रीतःप्रशस्यप्राविशद्गृहं ५४
अथकालउपावृत्तेदेवकीसर्वदेवता।पुत्रान्प्रसुषुवेचाष्टौकन्यांचैवानुवत्सरं ५५ कीर्तिमंतंप्रथ कृष्ण
मजंकंसायानकदुंदुभिः।अर्पयामासकृच्छ्रेणसोनृतादतिविह्वलः ५६ किंदुःसहंनुसाधूनांविदुषां ४
किमपेक्षितं।किमकार्यंकदर्याणांदुस्त्यजंकिंधृतात्मनां ५७ दृष्ट्वासमत्वंतच्छौरेःसत्येचैवव्यवस्थितिं।
कंसस्तुष्टमनाराजन्प्रहसन्निदमब्रवीत ५८ प्रतियातुकुमारोयंनह्यस्मादस्तिमेभयं।अष्टमाद्युवयो

र्गर्भान्मृत्युर्मेविहितःकिल ५९ तथेतिसुतमादाययावानकदुंदुभिः।नाभ्यनंदततद्वाक्यमसतोऽविजि
तात्मनः ६० नंदाद्यायेव्रजेगोपायाश्चामीषांचयोषितः।वृष्णयोवसुदेवाद्यादेवक्याद्यायदुस्त्रियः।सर्वे
वैदेवताप्रायाउभयोरपिभारत।ज्ञातयोबंधुसुहृदोयेचकंसमनुव्रताः ६२ एतत्कंसायभगवान्शशं
साभ्येत्यनारदः।भूमेर्भारायमाणानांदैत्यानांचवधोद्यमं ६३ ऋषेर्विनिर्गमेकंसोयदून्मत्वासुरानिति।
देवक्यागर्भसंभूतंविष्णुंचस्ववधंप्रति ६४ देवकींवसुदेवंचनिगृह्यनिगडैर्गृहे।जातंजातमहन्पुत्रंतयो
रजनशंकया ६५ मातरंपितरंभ्रातॄन्सर्वांश्चसुहृदस्तथा।घ्नंतिह्यसुतृपोलुब्धाराजानःप्रायशोभुवि ६६
आत्मानमिहसंजातंजानन्प्राग्विष्णुनाहतं।महासुरंकालनेमिंयदुभिःसव्यरुध्यत ६७ उग्रसेनंचपि
तरंयदुभोजांधकाधिपं।स्वयंनिगृह्यबुभुजेशूरसेनान्महाबलः ६८ इतिश्रीभागवतेमहापुराणे

Indira Gandhi National
Centre for the Arts

र्यया १९ प्रतियाते तु देवर्षौ कंस आभाष्य केशिनं। प्रेषयामास हन्येतौ भवतारामकेशवौ २० त
तो मुष्टिकचाणूरशलतोशलकादिकान्। आमात्यान् हस्तिपांश्चैव समाहूयाह भोजराट् २१ भोभो नि
शम्यतामेतद्धीर चाणूरमुष्टिकाः। नंदव्रजे किलामातेसुतावानकदुंदुभेः २२ रामकृष्णौ ततो मह्यं मृत्युः
किल निदर्शिनः। मवृद्धाविह संप्राप्तौ हन्येतां मल्ललीलया २३ मंचाः क्रियंतां विविधा मल्लरंगपरिश्रि
ताः। पौरजानपदाः सर्वे पश्यंत्वस्वैरसंयुगं २४ महामात्र त्वया भद्र रंगद्वारसुपनीतो। द्विपः कुवलयापीडो
न हिते न ममाहितौ २५ आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधि। विशसंतु पशून्मेध्यान्भूतराजाय मी
षे २६ इत्याज्ञाप्यार्थनेत्रज्ञ आहूय यदुपुंगवं। गृहीत्वा पाणिना पाणिं ततोक्रूरमुवाच ह २७ भोभो
दानपते मह्यं क्रियतामेत्रमादरतः। नान्यस्त्वत्तो हिततमो विद्यते भोजवृष्णिषु २८ अतस्त्वामाश्रितः सो

कलम
८९

म्य कार्यगौरवसाधनं। यथेंद्रो विष्णुमाश्रित्य स्वार्थमध्यगमद्विभुः २९ गच्छ नंदव्रजं तत्र सुतावानक
दुंदुभेः। आयातौ ताविहानेन रथेनानय माचिरं ३० निसृष्टः किल मे मृत्युर्देवैर्वैकुंठसंश्रयैः। तावान
यस्व गोपैर्नंदाद्यैः साम्युपायनैः ३१ घातयिष्य इहानीतौ कालकल्पेन हस्तिना। यदि मुक्तौ ततो मल्लै
र्घातये वैद्युतोपमैः ३२ तयोर्निहतयोः सत्ता वसुदेवपुरोगमान्। तद्बंधून्निहनिष्यामि हस्तिभोज उद्दशा
र्हकान् ३३ उग्रसेनं च पितरं स्थविरं राज्यकामुकं। तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ३४ ततश्चे
षो महीमिमां विजीनष्टकंटका। जरासंधो मम गुरुर्द्विविदो दयितः सखा ३५ शंबरो नरको बाणो म
प्यवह्नतमो हृदः। तैरहं सुरपक्षीयान् हत्वा भोक्ष्ये महीं नृपान् ३६ एतद्ज्ञात्वा न पक्षिस्तं रामकृष्णावि
हामेकौ। धनुर्महविनिराज्ञार्थं द्रष्टुं यदुपुरश्रियं ३७ अक्रूर उवाच राजेन्मनीषितं सध्यक् तव स्त्वाव

Indira Gandhi National Centre for the Arts

द॰ पु॰ १०८

नवकिशोरस्त्वं वलश्च वलिनां वरः। लीलयेभो हतो येन सहस्रद्विपसत्वभृत ३९ तस्माद्भवद्भ्यां वलि
भिर्योद्धव्यं नानयो ऽत्र वै। मयि विक्रम वार्ष्णेय वलेन सह मुष्टिकः ४० इति श्रीभागवते महापुराणे दशम
स्कंधे त्रिचत्वारिंशोऽध्यायः श्रीशुक उवाच एवं चर्चितसंकल्पो भगवान्मधुसूदनः। आससादाथ चा
णूरं मुष्टिकं रोहिणीसुतः १ हस्ताभ्यां हस्तयोर्वद्ध्वा पद्भ्यामेव च पादयोः। विचकर्षतुरन्योन्यं प्रसह्य विजि
गीषया २ अरत्नी द्वे अरत्निभ्यां जानुभ्यां चैव जानुनी। शिरः शीर्ष्णोरसोरस्तावन्योन्यमभिजघ्नतुः ३ प
रिभ्रामणविक्षेपपरिरंभावपातनैः। उत्सर्पणापसर्पणैश्चान्योन्यं प्रत्यरुंधतां ४ उत्थापनैरुन्नयनै
श्चालनैः स्थापनैरपि। परस्परं जिगीषंतावपचक्रतुरात्मनः ५ तद्वलावलवद्युद्धं समेताः सर्वयोषि
तः। ऊचुः परस्परं राजन्सानुकंपा वरूथशः ६ महानयं वताधर्म एषां राजसभासदां। ये वलावलवद्यु

कृष्ण १०८

द्धं राज्ञोऽन्विच्छंति पश्यतः ७ क्व वज्रसारसर्वांगौ मल्लौ शैलेंद्रसन्निभौ। क्व चातिसुकुमारांगौ किशो
रौ नाप्तयौवनौ ८ धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत्। यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचि
त् ९ न सभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन्। अब्रुवन्विब्रुवन्नज्ञो नरः किल्बिषमश्नुते १० वल्गतः
शत्रुमभितः कृष्णस्य वदनांबुजं। वीक्ष्यतां श्रमवार्युप्तं पद्मकोशमिवांबुभिः ११ किं न पश्यत रामस्य मुख
माताम्रलोचनं। मुष्टिकं प्रति सामर्षं हाससंरंभशोभितं १२ पुण्या वत व्रजभुवो यदयं नृलिंगगूढः पुराण
पुरुषो वनचित्रमाल्यः। गाः पालयन्सह वलः क्वणयंश्च वेणुं विक्रीडयांचति गिरित्ररमार्चितांघ्रिः १३
गोप्यस्तपः किमचरन्यदमुष्य रूपं लावण्यसारमसमोर्ध्वमनन्यसिद्धं। दृग्भिः पिवंत्यनुसवाभिनवं
दुरापमेकांतधाम यशसः श्रिय ऐश्वरस्य १४ या दोहनेऽवहनने मथनोपलेपप्रेंखेंखनार्भरुदितो

Indira Gandhi National
Centre for the Arts

